इत्येताभ्यां तिलोदकाञ्जलीन् दद्यात्। ततो मूलादितः पितृतीर्थेन पिण्डान् दद्यात्। तत्र क्रमः
"अस्मत्कुले मृता ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१॥
मातामहकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥२॥
बन्धुवर्गकुले ये च गतिर्येषां न विद्यते।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥३॥
अजातदन्ता ये केचित् ये च गर्भे प्रपीड़िताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥४॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथा परे।
विद्युच्चौरहता ये च तेभ्यः पिण्डं ददाम्यहम्॥५॥
दावदाहे मृता ये च सिंहव्याघ्रहताश्च ये।
दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यः पिण्डं ददाम्यहम् ॥६॥
उद्बन्धनमृता ये च विषशस्त्रहताश्च ये।
आत्मोपघातिनो ये च तेभ्यः पिण्डं ददाम्यहम्॥७॥
अरण्ये वर्त्मनि वने क्षुधया तृषया हताः।
भूतप्रेतपिशाचाश्च तेभ्यः पिण्डं ददाम्यहम् ॥
वने जले ॥ ८ ॥
रौरवे चान्धतामिस्रे कालसूत्रे च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥९॥
अनेकयातनासंस्थाः प्रेतलोके च ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१०॥
अनेकयातनासंस्था ये नीता यमकिङ्करैः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥११॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥१२॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥ १३ ॥
जात्यन्तरसहस्रेषु भ्रमन्तः स्वेन कर्म्मणा।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥१४॥
दिव्यन्तरीक्षभूमिष्ठाः पितरो बान्धवादयः।
मृता असंस्कृता ये च तेभ्यः पिण्डं ददाम्यहम् ॥ १५ ॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥१६॥
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः।
तेषां पिण्डो मया दत्तः अक्षय्यमुपतिष्ठताम्॥१७॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः॥
ये मे कुले लुप्तपिण्डाः पुत्त्रदारविवर्ज्जिताः।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा॥
विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम।
तेषां पिण्डो मया दत्तः अक्षय्यमुपतिष्ठताम्॥१८॥
आब्रह्मणो ये पितृवंशजाता
मातुस्तथा वंशभवा मदीयाः।
कुलद्वये ये मम दासभूता
भृत्यास्तथैवाश्रितसेवकाश्च ॥
मित्राणि सख्यः पशवश्च वृक्षा
दृष्टा ह्यदृष्टाश्च कृतोपकाराः।
जन्मान्तरे ये मम दासभूता-
स्तेभ्यः स्वधा पिण्डमहं ददामि ॥१९॥
अत्रोनविंशतिपिण्डे षोड़शपिण्डत्वं पारिभाषिकं पञ्चाम्रवत्। इति तिथ्यादितत्त्वम् ॥*॥ एतेषां मन्त्राणां स्त्रीलिङ्गोक्तेन स्त्रीषोड़शीत्वं भवति॥*

अथ मातृषोड़शी।
"गर्भादवगमे चैव विषमे भूमिवर्त्मनि।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
मासि मासि कृतं कष्टं वेदना प्रसवेषु च।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
शैथिल्ये प्रसवे चैव मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पद्भ्यां जनयते मातुर्दुःखञ्चैव सुदुस्तरम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पद्भ्यामित्यत्र दद्भ्यामिति च पाठः ॥ ४ ॥
अग्निना शोषते देहं त्रिरात्रानशनेषु च।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पिबेच्च कटुद्रव्याणि क्वाथानि विविधानि च।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
दुर्लभं भक्षद्रव्यस्य त्यागे विन्दति यत् फलम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
रात्रौ मूत्रपुरीषाभ्यां भिद्यते मातृकर्पटम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पुत्त्रं व्याधिसमायुक्तं मातृदुःखमहर्निशम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम् ॥
यदा पुत्त्रो न लभते तदा मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम् ॥
क्षुधया विह्वले पुत्त्रे ददाति निर्भरं स्तनम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
दिवा रात्रौ यदा मातुः शोषणञ्च पुनः पुनः।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
पूर्णे तु दशमे मासि मातुरत्यन्तदुष्करम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
गात्रभङ्गो भवेन्मातुस्तृप्तिं नैव प्रयच्छति।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम् ॥
अल्पाहारवती माता यावत् पुत्त्रोऽस्ति बालकः।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
यमद्वारे महाघोरे पथि मातुश्च शोचनम्।
तस्या निष्क्रमणार्थाय मातृपिण्डं ददाम्यहम्॥
इति गयायां प्रसिद्धिः॥

षोड़शोपचारः, पुं, (षोड़शप्रकार उपचारः।) षोड़शप्रकारपूजाद्रव्यम्। यथा,—
"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनस्नानवसनाभरणानि च ॥
सुगन्धिसुमनोधूपदीपनैवेद्यवन्दनम्।
प्रयोजयेदर्च्चनायां उपचारांस्तु षोड़श ॥"
इति तन्त्रसारः॥

षोढ़ा, व्य, (षष् + धाच्। पृषोदरादित्वात् साधु।) षट्प्रकारम्। यथा,—
"सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्व्वाहकैककार्य्यत्वे षोढ़ा सङ्गतिरिष्यते ॥"
इत्यनुमितौ जागदीशी टीका॥ संख्याया धाच्प्रकारे। इति सूत्रेण षष्शब्दात् धाच्प्रत्ययेन निपातनात्सिद्धम्। इति मुग्धबोधव्याकरणम्॥

षोढ़ान्यासः, पुं, (षोढ़ा षड्धा न्यासः।) विधिना शरीरे मन्त्रविन्यासः। यथा। अथ षोढ़ान्यासः। तदुक्तं वीरतन्त्रे।
"केवलां मातृकां कृत्वा मातृकां तारसंपुटाम्।
मातृकापुटितं तारं न्यसेत् साधकसत्तमः ॥१॥
श्रीबीजपुटितां तान्तु मातृकापुटितन्तु तत् ॥२
कामेन पुटितां देवीं तत्पुटं काममेव च ॥३॥
शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटां न्यसेत्
क्रीं हस्त्रञ्च पुनर्न्यस्त्वा ऋ-ॠ-लृ-ॡञ्च पूर्व्ववत् ॥५
मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च ॥६॥
अनुलोमविलोमेन न्यस्त्वा मन्त्रं यथाविधि।
मूलेनाष्टशतं कुर्य्यात् व्यापकं तदनन्तरम् ॥"
यथा, प्रणवपुटितां मातृकाम्। एवं मातृकापुटितं तारम्। एवं श्रीबीजपुटितां ताम्। तत्पुटितं श्रीबीजम्। एवं कामेन पुटितां मातृकाम्। मातृकापुटितं कामम्। एवं शक्त्या पुटितां मातृकाम्। मातृकापुटितां शक्तिं न्यसेत्। तथा क्रीं हस्त्रञ्च ऋ-ॠ-लृ-ॡञ्च पूर्व्ववत्। तत्पुटितां मातृकां न्यसेत्। मातृकापुटितं तञ्च तत्। मन्त्रपुटितां मातृकाम्। तत्पुटितं मन्त्रम्। पुनरनुलोमविलोमेन केवलं मातृकास्थाने न्यस्य मूलेनाष्टशतेन व्यापकं कुर्य्यात्। अयं न्यासस्ताराया अपि कार्य्यः।
"इति गुप्तेन दुर्गाया अङ्गषोढ़ा प्रकीर्त्तिता।
ताराया: कालिकायाश्च उन्मुख्याश्च तथा-परे।
एतस्मिन् न्यासवर्य्ये च सर्व्वं पापं प्रणश्यति ॥"
इति तन्त्रसारः॥

ष्टक, म प्रतीघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, तिष्टकयिषति। इति दुर्गादासः॥

ष्टग, म ए संवृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, तिष्टगयिषति। दन्त्यवर्गद्वितीयोपध इति केचित्। इति दुर्गादासः॥

ष्टन, मि शब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मि, स्तनयति स्तानयति अतिष्टनत्। इति दुर्गादासः॥

ष्टभ, इ ङ स्तम्भे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक० च सेट्।) इ, स्तम्भते। ङ, स्तम्भते। तिष्टम्भयिषति। इकारस्य पुनरुक्तिः पूर्व्ववत् तत्सम्बन्धिनिषेधायैव ङितस्तु सर्व्वे। एकपदेत् पाठबलात् बाध्य इति वत्। स्तम्भो जड़ीभावः जड़ीकरणञ्च। स्तम्भौ स्तम्भाजड़ीभावौ इत्यमरोक्तेः। शीतेनावस्तब्धः जड़ीकृत इत्यर्थः। इति क्रमदीश्वरोक्तेश्च। स्तम्भ इह क्रियानिरोधः। इति भीमः। दीर्घद्वर्द्धिरिति गोविन्दभट्टः। स्तम्भो दृढीकरणञ्च। स्तम्भते कवाटेन द्वारं लोकः। इति दुर्गादासः॥